## श्येनतिलस्य पाते ञे। (७१/१२६८)

श्येन तिल इत्येतयोः पातशब्दे उत्तरपदे ञप्रत्यये [1]परे मुमागमो भवति। श्येनपातोऽस्यां [2]क्रीडायाम् श्यैनम्पाता। तैलम्पाता। ञे इति किम्? श्येनपातः[3]॥

## रात्रेः कृति विभाषा। (७२/१००८)

रात्रेः कृदन्त उत्तरपदे विभाषा मुमागमो भवति। रात्रिञ्चरः, रात्रिचरः। रात्रिमटः, रात्र्यटः। अप्राप्तविभाषा इयम्। [4]खिति हि नित्यं मुम् भवति। [5]रात्रिम्मन्यः॥

## नलोपो नञः। (७३/८८७)

नञो नकारस्य लोपो भवति उत्तरपदे। अब्राह्मणः। अवृषलः। असुरापः। असोमपः।

[७५४] नञो नलोपेऽवक्षेपे तिङ्युपसङ्ख्यानं कर्तव्यम्। (म.भा. ३.१६९)

अपचसि त्वं जाल्म। अकरोषि त्वं जाल्म॥

## तस्मान्नुडचि। (७४/७८८)

तस्माल्लुप्तनकारान्नञः नुडागमो भवति अजादावुत्तरपदे। अनजः। अनश्वः[6]। तस्मात् इति किम्? नञ एव हि स्यात्। पूर्वान्ते हि 'ङमो ह्रस्वादचि ङमुण्नित्यम्' (८.३.३२/१३४) इति प्राप्नोति[7]॥

## नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या। (७८/७८९)

नभ्राट् नपात् नवेदाः नासत्याः [8]नमुचि नकुल नख नपुंसक नक्षत्र नक्र नाक इत्येतेषु नञ् [9]प्रकृत्या भवति। न भ्राजते इति नभ्राट्। भ्राजतेः क्विबन्तस्य नञ्समासः। न पाति इति नपात्। पातिः शत्रन्तः। न वेत्ति इति नवेदाः। वेत्तिरसुन्प्रत्ययान्तः। नासत्याः – सत्सु साधवः सत्याः, न सत्याः असत्याः, न असत्याः नासत्याः। न मुञ्चति इति नमुचिः। मुचेरौणादिकः कि[10]प्रत्ययः।

न अस्य कुलमस्ति नकुलः। नख – नास्य खमस्ति इति नखम्। नपुंसक – न स्त्री न पुमान् नपुंसकम्। स्त्रीपुंसयोः पुंसकभावो [11]निपात्यते। नक्षत्र – न [12]क्षरते क्षीयते इति वा नक्षत्रम्। क्षियः क्षरतेर्वा क्षत्रम् इति निपात्यते। नक्र – न क्रामति इति नक्रः। क्रमेर्डप्रत्ययो निपातनात्। नाक – नास्मिन् अकमस्ति नाकम्॥

---

1. परतो ब. 2. क्रियायां ह. 3. तिलपातः इत्यधिकम् ब. 4. खिविहिते क. 5. रात्रिम्मन्यमहः ब. 6. अनुष्ट्रः इत्यधिकम् ह.फ.ग. 7. अचीति किम्? अब्राह्मणः इत्यधिकम् ब. 8. नमुचि ब. 9. न विकारमापद्यते ब. 10. किन् प्रत्ययः ह. 11. निपातनात् ब.फ.ह. 12. क्षरति ब.क.ड.